ॐ श्रीगणेशाय नमः ॥ अथाथर्ववेदीयहनुमद्दुर्गम् ॥ यो देवेभ्य आतपति यो देवानां पुरोहितः ॥ पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥ १ ॥ श्रीरामाय नमः ॥ ॐ अस्य श्रीअनन्तघोरप्रलयज्वालाग्निरौद्रवीरहनुमदसाध्यसाधनाऽघोरास्त्रमूलमन्त्रस्य ईश्वर ऋषिरनुष्टुप्छन्दः श्रीरामलक्ष्मणौ देवते नानाछन्दांसि सौं बीजम् अञ्जनीसुत इति शक्तिर्वायुपुत्र इति कीलकं श्रीहनुमत्प्रसादसिद्ध्यर्थं स्वर्गलोकमृत्युलोकपाताललोकवश्यार्थं नवखण्डपृथ्वीस्थाखिलनृपलोकवश्यार्थमात्मनश्चाष्टसिद्धिसान्निध्यपूर्वकतत्त्वज्ञानजननोत्तरपरमपदप्राप्त्यर्थं जपे पाठे विनियोगः ॥ ॐनमो भगवते दावानलकालाग्निहनुमत्तेजो-

वितानधवलीकृतवज्रदेहवज्रकायवज्रतुण्डवज्रनखवज्र-
मुखवज्रबाहुवज्ररोमवज्रनेत्रवज्रदन्तवज्रकरकमठमया-
त्मकराय ॥ भीमकरपिङ्गलाक्षोग्रप्रलयकालाग्निरौद्रवी-
रभद्रावतारसर्वसात्विकभैरवदोर्दण्डलङ्कापुरीदाहनोदधि-
लङ्घनकृतसीताविश्वासेश्वरपुत्रवायुसुताऽञ्जनीगर्भसम्भू-
तोदयभास्करबिम्बानलदेवदानवर्षिमुनिवन्द्याऽवन्ध्यास्त्र-
पाशुपतास्त्रवायव्यास्त्रनारायणास्त्रकालशक्तिकालदण्डका-
लपाशाऽघोरास्त्रनिवारणाय ॥ नारायणास्त्रमृडाय ॥
सर्वशक्तिमयात्मकराय ॥ परविद्यानिवारणाय ॥ अग्नि-
दैवत्याय ॥ २ ॥ अथर्ववेदीयसिद्धिस्थिरकराय ॥ नि-
राहाराय ॥ वायुवेगमनोवेग श्रीरामतारकपरब्रह्मविश्वस्व-

रूपनीराजितलक्ष्मणप्राणप्रतिष्ठानन्दकराय २ ॥ जलस्थलाग्निगर्भमनो भेदय २ ॥ सर्वाञ्छत्रूञ्छेदय २ ॥ ममवैरिणं खादय ॥ २ ॥ सञ्जीवनपर्वतोत्पाटनाय २ ॥ डाकिनीशाकिनीविध्वंसनाय २ ॥ सुग्रीवसन्धितनिष्कलङ्कितकुमारब्रह्मचारिन्दिगम्बरदुष्टसर्वपापग्रहकुमारग्रहान्सर्वाञ्छेदय २ ॥ भेदय २ खादय २ ॥ कराटकांस्ताडय २॥ मारय २॥ शोषय २॥ ज्वालय २॥ हारय २ ॥ देवदत्तान्नाशय २ ॥ अतिशोषय २ ॥ मां मम बन्धूंश्च सर्वदा सर्वत्र रक्ष २ ॥ ॐ नमो भगवते श्रीप्रतापहनुमते महावीर्याय सर्वदुःखविनाशाय ॥ ग्रहमण्डलभूतमण्डलप्रेतमण्डलपिशाचमण्डलोच्चाटनाय २ ॥

अन्तर्भवादिज्वरमहेश्वरज्वरविष्णुज्वरब्रह्मज्वरविषमज्व-
रशीतज्वरवातज्वरपित्तज्वरैकाहिकद्व्याहिकत्र्याहिकचातु-
र्थकार्द्धमासिकमासिकषाण्मासिकसांवत्सरिकवातपित्त-
श्लेष्मजनितसन्निपातान्तर्गतापस्मारादिकं भ्रामयच्छेदय
२ ॥ भेदय २ ॥ ॐ नमो भगवते चिन्तामणिहनुमते अ-
ङ्गशूलाक्षिशूलगुदशूलकटिशूलजङ्घाशूलजानुशूलपा-
दशूलपित्तशूलवायुशूलस्तनशूलादिसर्वशूलानि निर्मूल-
य २ ॥ दानवदैत्यकामिनी वेतालब्रह्मराक्षसकोलाह-
लनागपाशानऽनन्तवासुकितक्षककर्कोटककर्कलिंगकपद्मक
कुमुदजज्वलस्थरोगपाशमहानागान् कालपाशान् विफ-
लान् विषं च निर्विषं कुरु २ स्वाहा ॥ ॐ नमो भगवते

श्रीपातालगरुडहनुमद्भैरवाय नवदिग्गजसिंहेन्द्रादिपाशान् बधान २ ॥ छिन्धि २ ॥ प्रलयमारुतकालाग्निहनुमते नमस्त्वं शृङ्खलाबन्धं मोचय २ ॥ सर्वबालग्रहांश्छेदय ॥ २ ॥ सर्वकार्य्यं साधय २ ॥ मम शरीरं सर्वथा निरुपाधिकं निरापत्तिकं च कृत्वा रक्ष २ ॥ सिंहभैरवरूपाय ते नमः ॥ ॐ ऱ्हां ऱ्हीं क्ष्रौं भैं घ्रां श्रीं क्रां क्लीं क्रां क्रीं ऱ्हां ऱ्हीं ऱ्हां हुं ऱ्हौं खं खं जय २ ॥ मारय २ ॥ गृहाण २ ॥ दमय ॥ वानराय २ खे खे हुं फट् स्वाहा ॥ ॐ नमो भगवते श्रीमद्धनुमद्वीर भ्रम २ ॥ चल २ ॥ कुरु २ ॥ एज २ ॥ हिंसि २ ॥ मर्दय २ ॥ दुष्टग्रहान् प्रज्वालय २ ॥ त्रासय २ ॥ सहस्रधास्त्रं निक्षिप २ ॥ त्रिशूलडमरुकालमृत्युकपालखट्वाङ्गं धारय २ ॥ मां भवदेकशरणं

सबन्धुम् अव ॥ २ ॥ शाश्वताय २ चापबन्धाय २ सर्वग्र-
हबन्धाय २ वीरबन्धाय २ सहस्रनयनाय २ आवर्त्ताय २
आद्यन्तबाह्याभ्यन्तरभूषणाय नमो भगवते त्वं परमन्त्र
परयन्त्र परतन्त्रं शतसहस्रकोटिप्रभाकरतेजोमयमपि भे-
दय २॥अग्निं शमय २॥ निर्वाणं कुरु २॥स्वाहा ॥ अनन्ता-
ग्निदुष्टाष्टकुलनागानां द्वादशकुलवृश्चिकानामेकादशकु-
लल्लूतानां निखिलसमुदायं घातय २ वज्रेणाङ्गांस्त्रोटय २
स्फोटय २॥अपसारय २ ॥मारणमोहनवशीकरणस्तम्भन
जृम्भणाकर्षणोच्चाटनस्फालनविद्वेषणयुद्धतर्कमर्मबन्धकु-
मारपादप्रहारबाणोग्रमूर्तये ग्रामवासनेतिपूर्वशक्तये सर्वा-
युधानामधिष्ठात्रे स्वाहा ॥ ॐ क्षयाय घोराय लंलं-

लंघांघांघांनिंनिंनिंस्वाहा ॥ ॐ हुंहुंहुंठंठंलंलंलं देव-
दत्तदिगम्बराय, अष्टभैरवाय अष्टाङ्गधराय वानरभैरव
नखदंष्ट्राधराय अष्टमहाशक्त्यष्टाङ्गधराय नवखण्डरूपाय द-
शविष्णुरूपाय एकादशरुद्रावताराय द्वादशार्कतेजोधराय
त्रयोदशश्याममुखाय मम सुखाय वीरहनुमते स्तम्भन-
मोहनवशीकरणादित्रयस्त्रिंशत्कलाविराजिताय नमः ॥
राजमुखबन्धाय नमः ॥ बलमुखबन्धाय नमः ॥ सर्वो-
पद्रवजनकग्रहभूतपिशाचडाकिनीशाकिनीराक्षसप्रेतवेता
लादिकुलं स्वकीयशृङ्खलानिगडितं कृत्वा सर्वं मम वशं
कुरु २ स्वाहा ॥ सम्मुखजिह्वाव्याघ्रसर्पवृश्चिकाग्निज्वा-
लाविषज्वालानिर्गण्डनसर्वजनवैरिमुखबन्धनाय वायुवी-

रहनुमते ईश्वरावताराय वायुनन्दनाय अंजनीसुताय नमः ॥ बन्धुसुबन्धुसत्यबन्धुश्रीरामचन्द्रवाचा महादेववाचा वीरभद्रवाचा मम सर्वकार्यं हनुमद्वीर साधय २ स्वाहा ॥ ॐ न्हांन्हींन्हूं असय २ न्हींन्हांघ्रांत्रीं यांभेंभ्रेंभ्रांहट् २ षट् २ विश्वषट् शत्रुषट् वश्यषट् सर्वजनाशिदश्र्यषट् श्रींल्हांल्हांल्हीं मनस्तम्भय २ जम्भय २ अद्री २ न्हींन्हांन्हीं मे सर्वन्हांन्हीं सागर हींहीं सर्ववश्यं सर्वमन्त्रार्थसिद्धिं च कुरु २ स्वाहा ॥ श्रद्धाभक्तिसमायुक्तो नित्यं देवर्षितर्पकः ॥ सावित्रीसहितोधर्मी परनिन्दाविवर्जितः ॥ १ ॥ आत्मशक्त्यनुसारेण सन्ध्या यां यः पठेच्छुचिः ॥ विन्दतेऽनुपमां कीर्तिं धर्मार्थौ मोक्षमव्ययम् ॥ २ ॥ अस्मात्परतरं नास्ति

लोके कल्याणकारकम् अदःसर्वार्थदं दुर्गं जप्यं ध्येयं च धीमता ॥ ३ ॥ इत्यथर्ववेदानुसारिहनुमद्दुर्गम् ॥

अथर्ववेदंसमालोक्य कृत्वा तत्त्वविचारणाम् ॥
हृषीकेशेन विदुषा शोधितोयं यथामति ॥

ॐ श्रीरामाय नमः ॥ अथ पञ्चमुखिहनुमत्कवचम् ॥ ॐ अस्य श्रीपञ्चमुखिहनुमत्कवचस्तोत्रमन्त्रस्य श्रीरामचन्द्र ऋषिरनुष्टुप्छन्दः ॥ श्रीहनुमान् परमात्मा देवता ॥ पञ्चमुखिहनुमान् इति बीजं ॥ वायुपुत्र इति शक्तिः ॥ अञ्जनीसुत इति कीलकं ॥ श्रीरामचन्द्रहनुमत्प्रसादसिद्ध्यर्थं जपे पाठे विनियोगः ॥ अथ करन्यासः ॥ ॐ अञ्जनीसुताय अङ्गुष्ठाभ्यां नमः ॥ ॐ रुद्रमूर्तये तर्जनी-

भ्यां नमः ॥ ॐ वायुपुत्राय मध्यमाभ्यां नमः ॐ अग्नि-
गर्भाय अनामिकाभ्यां नमः ॥ ॐ रामदूताय कनिष्ठिका
भ्यां नमः ॥ ॐ ब्रह्मास्त्रनिवारणाय करतलकरपृष्ठाभ्यां
नमः ॥ इति करन्यासः ॥ अथ हृदयादिन्यासः ॐ अ-
ञ्जनीसुताय हृदयाय नमः ॥ ॐ रुद्रमूर्तये नमः शिर-
से स्वाहा ॥ ॐ वायुपुत्राय नमः शिखायै वषट् ॥ ॐ
अग्निगर्भाय कवचाय हुम् ॥ ॐ रामदूताय नमः नेत्रत्र-
याय वौषट् ॥ ॐ ब्रह्मास्त्रनिवारणाय अस्त्राय फट् ॥ ॐ रां
रीं रूं रौं रः ॥ इति हृदयादिन्यासः ॥ अथ ध्यानम् ॥ श्रीराम-
चन्द्राय अञ्जनीसुताय वायुपुत्राय महाबलभाय सीतादुः-
खनिवारणाय लङ्कादाहनाय एकवीराय प्रचण्डाय फा-

ल्गुनसखाय कोलाहललितसकलब्रह्माण्डरूपाय समुद्र-
नीरलङ्घनाय अमितविक्रमाय सूर्यबिम्बोत्फलसेविताय
दृष्टिनिरालङ्कृताय सञ्जीवनीसाचिव्यसाधकाय अङ्गदल-
क्ष्मणाय लक्ष्मणप्राणरक्षकाय कपिसैन्यप्राणनिर्वाहकाय
दशकण्ठविध्वंसनाय रामेष्टप्रियसज्जनसखाय सीतासहि-
तरामचन्द्रवरप्रसादकाय नमः ॥ इति ध्यानम् ॥ षट्प्र-
योगागमपञ्चमुखिहनुमत्कवचं सम्यग्ध्यात्वा पठेत् ॐ ह-
रिमर्कटमर्कटाय वंवंवंवंवंफट्स्वाहा ॥ ॐ हरिमर्कटम-
र्कटाय फंफंफंफंफं फट्स्वाहा ॥ ॐ हरिमर्कटमर्कटाय
हुंहुंहुंहुंहुंवषट्स्वाहा ॥ ॐ हरिमर्कटमर्कटाय खेंखेंखेंखेंखें
मारणाय स्वाहा ॥ ॐ हरिमर्कटमर्कटाय ठंठंठंठंठं स्त-

स्मनाय स्वाहा ॥ ॐॐॐॐॐ अखिलसुखसंपत्कराय स्वाहा ॥ ॐ पञ्चमुखिहयग्रीवाय रुंरुंरुंरुं रुद्रमूर्तये सकलजननिर्वाहकारकश्रीपञ्चमुखिहनूमते स्वाहा ॥ उच्चाटनाय ढंढंढंढंढं सकलमूर्तये पञ्चमुखिहनुमते परमन्त्रपरयन्त्र परतन्त्रोच्चाटनाय स्वाहा ॥ ॐ कंखंगंघंङं चंछंजंझंञं टंठंडंढंणं तंथंदंधंनं पंफंबंभंमं यंरंलंवंशंषंसंहं स्वाहा ॥ दिग्बन्धनम् ॥ ॐ पूर्वमुखिपञ्चमुखिहनुमते ढंढंढंढंढं सर्वशत्रुसंहारकाय स्वाहा॥ॐ दक्षिणमुखपञ्चमुखिहनुमते करालनृसिंहाय हांहांहांहांहां सकलभूतप्रेतपिशाचब्रह्मराक्षसनिरासकाय स्वाहा ॥ ॐ पश्चिममुखपंचमुखिहनुमते वीरगरुडाय मंमंमंमंमं सकलविश्वहराय

स्वाहा ॥ ॐउत्तरमुखपञ्चमुखिहनुमते आदिवाराहाय लं-
लंलंलंलं संहं नीलकण्ठाय कल्याणमूर्तये अञ्जनीसुताय
वायुपुत्राय महाबलाय सीताशोकनिवारणाय लक्ष्मणप्रा-
णरक्षकाय दशग्रीवहरणाय श्रीरामचन्द्रपादुकारूपाय ॥
महावीर्याय प्रमथनाय ब्रह्मांडवायुकायोद्भूताय पञ्चमुखि-
वीरहनुमते नमः॥भूतप्रेतपिशाचब्रह्मराक्षसशाकिनीडाकि
नीप्रबलांतरिक्षचरग्रहोपरोधायमदीयसर्वाङ्गनिवासकराय
परमात्मस्वरूपाय पञ्चमुखिहनुमते सर्ववरप्रसाधकाय जं-
जंजंजंजं फट्स्वाहा ॥ सायंप्रातः शुचिर्भूत्वा कवचं तु प-
ठेन्नरः ॥ एकवारं पठेन्नित्यं सर्वसिद्धिर्भवेद्ध्रुवम् ॥ १ ॥
द्विवारंच पठेनित्यं पुत्रपौत्रविवर्द्धनम् ॥ त्रिवारंच पठेद्यस्तु

सर्वशक्तिमवाप्नुयात् ॥ २ ॥ चतुर्वारं पठेन्नित्यं सर्वमंगलदायकम् ॥ पञ्चवारं पठेन्नित्यं सर्वदेववशीकरम् ॥३॥ षड्वारं यः पठेन्नित्यं सर्वदेवप्रियो भवेत् ॥ सप्तवारं पठेद्यस्तु सर्वसौभाग्यमाप्नुयात् ॥ ४ ॥ अष्टवारं पठेन्नित्यमिष्टकामार्थसिद्धिदम् ॥ नववारं पठेद्यस्तु सर्वमंगलमाप्नुयात् ॥ ५ ॥ दशमावर्तयेद्यस्तु त्रैलोक्यज्ञानदर्शनम् ॥ एकादशजपादस्य पूर्णसिद्धिर्भवेन्नरः॥६॥कवचस्मरणेनैव महाबलसमन्वितः ॥ जयीभूतश्चरन्नुर्व्यामन्ते मोक्षमवाप्नुयात् ॥ ७ ॥ संहितांचसमालोक्य सुदर्शनकृतां हिताम् ॥ हृषीकेशेन विदुषा शोधितोऽयं यथामति॥८॥श्रीसुदर्शनसंहितायांरामचन्द्रमनोहरपञ्चमुखिहनुमत्कवचं समाप्तम् ॥

श्रीगणेशाय नमः ॥ ॐ श्रीसरस्वत्यै नमः ॥ अस्य श्रीसरस्वतीस्तोत्रमन्त्रस्य ॥ नारायणऋषिरनुष्टुप्छन्दः ॥ श्रीवाग्देवी देवता स्वकीयवाक्सिद्ध्यर्थं जपे पाठे विनियोगः ॥ ॐ सरस्वतीं नमस्यामि चेतनां हृदि संस्थिताम्॥ कण्ठस्थां पद्मयोनेस्तु ह्रींह्रींमन्त्रप्रियां वराम् ॥ १ ॥ मतिदां वरदां शुद्धां वीणाहस्तां कराम्बुजाम् ॥ ऐंऐंमन्त्रप्रियां ह्रींह्रीं कुमतिध्वंसकारिणीम् ॥ २ ॥ स्वप्रकाशां निरालम्बामज्ञानतिमिरापहाम् ॥ केशवस्य प्रियां देवीं सर्वालङ्कारभूषिताम् ॥ ३ ॥ मुक्तां मोक्षप्रदां रम्यां सुभगां शोभनप्रियाम् ॥ पद्मासनां ण्डकुलिनीं शुक्लवर्णां मनोरमाम् ॥ ४ ॥ आदित्यमण्डले नित्यं प्रणमामि

जनप्रियाम् ॥ इति सा संस्तुता देवी वागीशेन महात्मना ॥ आत्मानं दर्शयामास शरदिन्दुसमप्रभाम् ॥ श्रीपार्वत्युवाच ॥ वरं वृणीष्व भद्रं ते यत्ते मनसि वर्तते॥ ६॥ बृहस्पतिरुवाच ॥ यदा यदि मे देवि भद्रं ज्ञानं प्रयच्छ मे ॥ श्रीदेव्युवाच ॥ दत्तं ते निर्मलं ज्ञानमज्ञानतिमिरापहम् ॥७॥ शास्त्रं सुरम्यं निर्माय मूढज्ञानप्रकाशकम्॥ सर्वेषां ज्ञानदो भूत्वा निर्भरं विचरानिशम् ॥ ८ ॥ स्तोत्रेणानेन मां वत्स ये स्तुवन्तीह मानवाः ॥ तेषां कण्ठे सदा वासं करिष्यामि न संशयः ॥ ९ ॥ इति श्रीलिङ्गपुराणे सरस्वतीस्तोत्रं समाप्तम् ॥

॥ नमामिदीन० ॥ २ ॥ पुरेदृशीतनूर्धृतानमु-
क्तिदेतिदर्शकं ॥ करद्वयंकटिस्थलेदधानमीडय-
मीश्वरम् ॥ नवीनमेघमण्डलीमनोहरंपरंवरं ॥
नमामिदीन० ॥ ३ ॥ जनिच्छिदंजराच्छि-
दंमृतिच्छिदंतमश्छिदं ॥ भिदाच्छिदन्तकच्छिदं-
सुरेशद्विट्छिदाच्छिदम् ॥ कलिन्दनंदिनीतटे
प्रसारितातिचातुरिं ॥ नमामि० ॥ ४ ॥
निलिम्पवृंददुःखभिन्नदीविधौतपादकं ॥ वि-

भातरत्नमौक्तिकादिभाविभातपीठकम् ॥ न-
खप्रभाविलाञ्छितेन्दुशूलिपूज्यमीश्वरम् ॥ न-
मामि० ॥ ५ ॥ सुपांडुरंगपंचकंमुरारिकी-
र्तिमंचकं ॥ पठेत्कृपालुविट्ठलंत्वदिस्मरन्विनि-
र्मलं ॥ हरेश्चताण्डवेरतोगतागताद्विनि-
र्गतो ॥ भवेद्भवाब्धिमुत्तरन्नरोवरोनवैचि-
रात् ॥ ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इतिश्रीमदुदासीन शिरोऽवतंसपरमहंस-
गौरदासचरणांबुजदासकेशवानंदयति निर्मितं
श्रीविट्ठलपंचकम् ॥

॥ श्रीरुक्मिण्यैनमोमुहुर्मुहुः ॥ यल्लीला-
लतिकासुलग्नमतुलंमोक्षंफलंयाचते ॥ जन्तु-
र्जन्मजराधिभीतविमनाःकीर्तियदीयांब्रुवन् ॥
कामक्रोधविशालजालमखिलंसंत्रोटयमुक्तोभ-

वेत् ॥ सद्यस्तांसमुपास्महेप्रतिदिनंश्रीरुक्मि-
णींमानसे ॥ १ ॥ किंत्रैलोक्यसरोवरे वि-
चलतामुन्निद्रमेकाम्बुजम् ॥ मोक्षामोदभरंस्व-
लग्नमनसांश्रद्धाल्वलीनांकृते ॥ किंवायोगि-
मनोविशुद्धकमलप्रोद्बोधकोभास्करो ॥ देवि-
त्वांवदकीदृशींविगणयेसर्वात्मिकेरुक्मिणि ॥
२ ॥ श्रीविठ्ठलप्रियतमांसततंभजामि ॥
श्रीरुक्मिणींसकललोकधरान्नमामि ॥ श्री-

कृष्णवल्लभरतांशरणंव्रजामि॥ श्रीमाधवारिभ-
यदामानिशंस्मरामि ॥ ३ ॥ जगज्जालव्या-
लाद्विषयगरलाद्भ्रांतिरचिताद् ॥ विभीता-
न्स्वान्नीतानवतिजगदम्बाश्रुतामिति ॥ ततः
संप्राप्तंमांत्वमवजगदाद्येवततः ॥ त्वदन्यःकः
पायाद्विगलितमतिम्माविशरणम् ॥ ४ ॥
कृपादृष्टिंयस्याभुविदिविचपातालभुवने ॥ न-
रादेवानागाःसमधिगतराज्याधिसकलाः ॥

सदावांछंतिश्रीःसुरनरमुनीन्द्रैरपिनुतेशरण्या-
यादेव्यास्तवशरणमेमिध्रुवमहम् ॥ ५ ॥ स्व-
दीप्त्येंदोःकांतिंपरमविमलांयाजयतिताम्॥स-
माराध्यश्रांताःकतिपयजनाःशांतिमगमन् ॥
सुरैःसंसेव्यांत्वाकविजनवरेण्यैरपिनुतां ॥
भजेभक्तैर्भाव्यांविमलमतिदांविष्ठलप्रियाम् ॥
६ ॥ असंगोयामीशःप्रभवतिविनानोरच-
यितु ॥ मिदंविश्वंपातुंहरणमपिकर्तुन्नजगतः ॥

अतस्तांविश्वाद्यांस्थितित्वदतिकरांशुभ्ररुचिरां
॥ भवन्तीन्नौमीडयांप्रतिदिनमलंकारललि-
ताम् ॥ ७ ॥ नदेवान्ननागान्नसिद्धान्प्रासिद्धान्
॥ नयक्षान्सुदक्षान्भवत्यैवरक्ष्यान् ॥ नमा-
मिस्मरामिप्रणौमिव्रजामि ॥ भजेहंभवंतींस्व-
भक्तानवंतीम् ॥ ८ ॥ इदंस्तोत्रंनित्यंपठति-
पुरुषोयस्तुविमलो ॥ त्वदिध्यायन्नम्बांजनि-
मृतिहरांविष्टलप्रियाम् ॥ सदेहंहित्वेमंविम-

लमचलंब्रह्मपरमं ॥ चिदानंदामंदंव्रजतिजगदंबासुकृपया ॥ ९ ॥ इदंभीमातटेस्तोत्रंकेशवानंदनिर्मितं ॥ समर्पितंसुखोद्गारंरुक्मिणीपादकंजयोः ॥ १० ॥

इतिश्रीमदुदासीनशिरोऽवतंसपरमहंसगौरदासचरणांबुजदासकेशवानंदयति निर्मितं रुक्मिण्यष्टकम् ॥

ॐ श्रीदत्तात्रेयायनमः ॥ नृणांभवाब्धि-
मग्नलग्नदुःखदीनचेतसा॥मदक्षतामरक्ष्यतान्नि
हंतुमागतंभुवि ॥ विभूतिभिर्विभूषितंयतीन्द्र-
वृंदपूजितं ॥ नमामिषड्भुजंहरिंशरण्यदत्तकं-
प्रभुम् ॥ १ ॥ सहस्रकोटिभानुभाविभा-
विताकृतिंविभुं ॥ चलल्ललामलोचनंस्वभक्त-
भीतिमोचनम् ॥ विपक्षपक्षभंजनंस्वभक्तप-
क्षरंजनं ॥ नमामि० ॥ २ ॥ कमंडलुंसुम-

॥स्तो०॥ ण्डलंसुमण्डदंडमुत्तमं ॥ सुशंखचक्रपद्मराजरा- ॥ सं० ॥
जमानमद्भुतम् ॥ गदींद्रवृंदवर्यमाद्यमाददान-
॥६॥ मक्षरं ॥ नमामि० ॥ ३ ॥ अखर्वसर्वमंग-
लंशुभंशशांकशीतलम् ॥ जगत्करंजगत्पपुं-
जगद्धरं परात्परं ॥ अमंदरत्नमौक्तिकैर्विरा-
जमानशेखरं ॥ नमामि० ॥ ४ ॥ मनोवि-
नोददायकं नमन्निलिम्पनायकं ॥ शुभांब-
रंदिगम्बरंचनिर्गुणं गुणान्वितम् ॥ सुचंद्र- ॥६॥

दीप्तिपादुकाधरत्पदारविंदकं ॥ नमा० ॥ ५ ॥ इदंसुदत्तपंचकं जनेर्मृतेश्चवंचकं ॥ नरः पठेदहर्निशंप्रमोदमानमानसः ॥ स्मरन्मुनींद्रदत्तकं स्वसाधकप्रसाददं ॥ सभुक्तिमुक्तिभाग्भवेदितीहमेविनिश्चितिः ॥ ६ ॥

इतिश्रीमदुदासीन शिरोऽवतंसपरमहंसगौरदासचरणांबुजदासकेशवानंदयति निर्मितं दत्तपंचकम् ॥ ॥

॥ सांगं सोमनाथाष्टकम् ॥

॥ श्रीसच्चिदानंदः ॥

॥ भुजङ्गप्रयातं वृत्तम् ॥

जटाजूटगंगं कृतानंगभंगम् । भवाब्धे-
श्चपारं सुनागेन्द्रहारम् ॥ चिदानन्दसारं सदा
निर्विकारं । शिवं सोमनाथं भजेऽहंभजेऽहम् ॥७॥

॥ १ ॥ स्वभक्तानसक्तान् विरक्तानुरक्तान् । वि-
भीतान् विनीतांश्चिदानन्दप्रीतान् ॥ नरान्-
मोचयन्तं भयं संहरन्तम् । शिवं सोमनाथम् ०
॥ २ ॥ विभूतिं ददानं सुभूतिं दधानम् । वि-
चित्रं पवित्रं सदारामामित्रम् । स्वभासा वि-
भान्तं सदाशान्तदान्तम् ॥ शिवं सोमनाथम् ०

---

१ विरक्तेषु अनुरक्तास्तानिति विरक्तानुरक्तान् अथवा विरक्तांश्चासावनुरक्तांश्चेति वा. २ शोभन भस्म. ३ सति ब्रह्मणि आरामो येषां ते सदारामाः ब्रह्मनिष्ठा वा.

॥स्तो०॥ ॥ ३ ॥ उमानन्दकन्दंसदानन्दिवंद्यम् । ॥सं०॥
निरीहं गिरीहं गिरं भूषयन्तम् ॥ कृताने-
॥८॥ कमन्तून् कुजन्तूनवन्तम् । शिवं सोमनाथ-
म्० ॥ ४ ॥ अनन्तं भवं भावुकान् भावय-
न्तम् । पुरारिं गजारिं मखारिं भवारिम्॥अ-
रूपं सुरूपं जगद्रूपभूपम्।शिवं सोमनाथम्०
॥५॥ विशालां करालां जगद्व्यालमालाम् ।

४ सति ब्रह्मणि आनन्दः सदानन्दःसोऽस्ति येषां तैःब्रह्मानन्दवद्भिः वन्द्य मितिवा. ५ कैलासस्थह लुम्. ६ विष्णुरूपिणम् नीरूपमितिवा. ॥८॥

कदा न त्यजन्तीमशेषं गिलन्तीम्॥ क्षणान्ना-
शयन्तं त्रिनेत्रीं धरन्तम् । शिवं सोमनाथ-
म्० ॥ ६ ॥ हिमांशुं वहन्तं त्रिलोकीभरन्त-
म् । शिवं शूलवन्तं सुरान् पालयन्तम् ।
जगद्भ्रामयन्तं परानन्दवन्तम् । शिवं सो-
मनाथम्० ॥ ७॥ गतामानमानं सदा निर्वि-
र्गानम् । विलोभं विमोहं मनःकामदोहम् ॥

---

७ मानावमानहीनम्. ८ निर्विरोधम्.

तमोहानिकारं मनोहानिहारम्[९] । शिवं सोम-
नाथम्० ॥ ८ ॥

(शार्दूलविक्रीडितं वृत्तम्)

कैलासाधिपतिं पतिं त्रिजगताम् मान्यं मुनी-
न्द्रैर्मुहुः ॥ संसारार्णवलंघने सुतरणिं सौख्यं
सुराणां परम् ॥ गोकर्णेश्वरभूषणं सकलगो-

९ चित्तविक्षेपहरम्. ९ कैलासेति० १० गौः चक्षुरेव कर्णो येषां, तेषां सर्पाणामीश्वरः वासुकिः स एव भूषणं यस्य तमित्यर्थः;

गम्यं[११] सुगोवाहनम्[१२] ॥ वन्देऽहं त्रिगुणीश्वरं[१३]
निखिलगोवासोभिराभूषितम्[१४] ॥ ९ ॥

(शिखरिणी वृत्तम्)

परामोदापूर्णः[१५] प्रवरसुमनःश्लाघ्यमहिमा ॥

---

११ निखिलवेदवेद्यम्. १२ शोभनवृषभवाहनम्. १३ त्रिनेत्रम्. १४ निखिला गावः दिशा एव वासांसि तैः, परामोदेति० १५ व्यर्थकोऽयं श्लोकःशिवपक्षे रामपक्षे च आमोदोहर्षः, आरामपक्षे गंधः आमोदो गन्धहर्षयोरिति मे० ॥

फलाशापूर्णाया विरभवदसौ निर्जरयुतः[१६] ॥
सदा सन्तापं यो हरति परहंसैरधिगतः[१७] ॥
सदाराम: शीतान्वितनुततनुः[१८] शं दिशतु[१९] नः

१६ शिवपक्षे रामपक्षेच निर्जराः देवः; अ रामपक्षे निर्जराः युवानो नराः. १७ शि० रा० परहंसा परमहंसाः अ.रामपक्षे—पक्षिविशेषाः. १८ शि० रा० सति ब्रह्मणि आरामो यस्य ससदारामः; रामपक्षे सदा राम इतिवा पदच्छेदः. आरामपक्षे—सदा अ.राम इति पदच्छेदः, संश्चासौ आराम इति वार्थः. १९ शिवपक्षे शीता सीतातदन्वितोरामः तेन नुततनुः शिवः, रामपक्षे शीतान्वितश्चासौ नुततनुश्चेति योज्यम्. ॥ शीतानभः सरिति लाङ्गल पद्धतौ च शीता दशाननारेपोः सहधर्मिणीचेति धरणिः; आरामपक्षे शीतं शैत्यं तेन अन्वितैर्नरैर्नुततनुरिति बोध्यम्. सदेति०—

॥ १० ॥ सदा पार्वत्यन्ते[२०] विहरति परानन्द-
भरितः ॥ चलन्मन्दं मन्दं भणति[२१] परमं यः
पशुपतिः[२२] ॥ अमन्दैः[२३] केशैर्यो भवति च वरा-
भोवरतनुः ॥ दशार्द्धास्यः[२४] पायात्करिमदनह-[२५]

---

२० शिवपक्षे पार्वती गौरी तन्निकटे. सिंहपक्षे पर्वतसंबंधिनी स्थली तत्समीपे. २१ शिवपक्षे गायति. सिंहपक्षे गर्जति. २२ शिवप० वृषभेश्वरः; सिंहप० मृगेन्द्रः. २३ नञो विरोधार्थकत्वादुत्तमैरितिबोध्यम्. २४ उभयपक्षे पंचास्यः, पंचानन इति शिवपक्षे त्रिस्तृताऽनन इति सिंहपक्षे बोध्यम्. २५ शिवपक्षे गजासुरकामयोर्हर्त्ता, सिंहपक्षे गजगर्वहर्त्ता.

॥स्तो॥ ॥११॥

र्त्ता हरिर्नुतः ॥ ११ ॥ इदं स्तोत्रं नित्यं प-
ठति पुरुषोयस्तु विमलो ॥ भवं ध्यायन् भ-
क्त्या भवभयहरं निर्भयपदम् ॥ अमन्दानन्दै-
चिद्घनममलमाद्यन्तरहितम् ॥ परं ब्रह्मेशा-
नं व्रजति स न चात्रास्ति विशयः ॥ १२ ॥

इतिश्रीमदुदासीन शिरोऽवर्तसपरमहंस-

॥सं॥ ॥११॥

---

२६ शिवपक्षे विष्णुनतः ; सं० अश्वत्थोपलक्षितनिखिल पशुनुतः ॥